# Shri Kamalambika Stotram

# श्रीकमलाम्बिकास्तोत्रम् अथवा श्रीकमलाम्बिकाष्टकम्

## Document Information

Text title : kamalAmbikAstotram or kamalAmbikAShTakaM

File name : kamalAmbikAstotram.itx

Category : devii, pArvatI, devI, dashamahAvidyA, aShTaka

Location : doc_devii

Proofread by : PSA Easwaran

Acknowledge-Permission: http://kshetrayaatra.blogspot.com

Latest update : July 27, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 30, 2022

*sanskritdocuments.org*

# श्रीकमलाम्बिकास्तोत्रम् अथवा श्रीकमलाम्बिकाष्टकम्

बन्धूकद्युतिमिन्दुबिम्बवदनां वृन्दारकैर्वन्दितां
मन्दारादि समर्चितां मधुमतीं मन्दस्मितां सुन्दरीम् ।
बन्धच्छेदनकारिणीं त्रिनयनां भोगापवर्गप्रदां
वन्देऽहं कमलाम्बिकामनुदिनं वाञ्छानुकूलां शिवाम् ॥ १॥

श्रीकामेश्वरपीठमध्यनिलयां श्रीराजराजेश्वरीं
श्रीवाणीपरिसेविताङ्घ्रियुगलां श्रीमत्कृपासागराम् ।
शोकापद्भयमोचिनीं सुकवितानन्दैकसन्दायिनीं
वन्देऽहं कमलाम्बिकामनुदिनं वाञ्छानुकूलां शिवाम् ॥ २॥

माया मोहविनाशिनीं मुनिगणैराराधितां तन्मयीं
श्रेयःसञ्चयदायिनीं गुणमयीं वाय्वादि भूतां सताम् ।
प्रातःकालसमानशोभमकुटां सामादि वेदैस्तुतां
वन्देऽहं कमलाम्बिकामनुदिनं वाञ्छानुकूलां शिवाम् ॥ ३॥

बालां भक्तजनौघचित्तनिलयां बालेन्दुचूडाम्बरां
सालोक्यादि चतुर्विधार्थफलदां नीलोत्पलाक्षीमजाम् ।
कालारिप्रियनायिकां कलिमलप्रध्वंसिनीं कौलिनीं
वन्देऽहं कमलाम्बिकामनुदिनं वाञ्छानुकूलां शिवाम् ॥ ४॥

आनन्दामृतसिन्धुमध्यनिलयामज्ञानमूलापहां
ज्ञानानन्दविवर्धिनीं विजयदां मीनेक्षणां मोहिनीम् ।
ज्ञानानन्दपरां गणेशजननीं गन्धर्वसम्पूजितां
वन्देऽहं कमलाम्बिकामनुदिनं वाञ्छानुकूलां शिवाम् ॥ ५॥

षट्चक्रोपरि नादबिन्दुनिलयां सर्वेश्वरीं सर्वगां
षट्शास्त्रागमवेदवेदितगुणां षट्कोणसंवासिनीम् ।
षट्कालेन समर्चितात्मविभवां षड्वर्गसञ्छेदिनीं
वन्देऽहं कमलाम्बिकामनुदिनं वाञ्छानुकूलां शिवाम् ॥ ६॥

योगानन्दकरीं जगत्सुखकरीं योगीन्द्रचित्तालयां
    एकामीशसुखप्रदां द्विजनुतामेकान्तसञ्चारिणीम् ।
वागीशां विधिविष्णुशम्भुवरदां विश्वेश्वरीं वैणिकीं
    वन्देऽहं कमलाम्बिकामनुदिनं वाञ्छानुकूलां शिवाम् ॥ ७॥

बोधानन्दमयीं बुधैरभिनुतां मोदप्रदामम्बिकां
    श्रीमद्वेदपुरीशदासविनुतां ह्रीङ्काररसन्धालयाम् ।
भेदाभेदविवर्जितां बहुविधां वेदान्तचूडामणिं
    वन्देऽहं कमलाम्बिकामनुदिनं वाञ्छानुकूलां शिवाम् ॥ ८॥

इत्थं श्रीकमलाम्बिकाप्रियकरं स्तोत्रं पठेद्यस्सदा
    पुत्रश्रीप्रदमष्टसिद्धिफलदं चिन्ताविनाशास्पदम् ।
एति ब्रह्मपदं निजं निरुपमं निष्कल्मषं निष्कलं
    योगीन्द्रैरपि दुर्लभं पुनरयं चिन्ताविनाशं परम् ॥ ९॥

इति श्रीकमलाम्बिकास्तोत्रं अथवा श्रीकमलाम्बिकाष्टकं सम्पूर्णम् ।

Proofread by PSA Easwaran

---

*Shri Kamalambika Stotram*

pdf was typeset on September 30, 2022

Please send corrections to *sanskrit@cheerful.com*